नवमः पाठः

# सुभाषितानि

CSTHXD

क्षणशः कणशश्चैव विद्यामर्थं च चिन्तयेत्।

क्षणत्यागे कुतो विद्या कणत्यागे कुतो धनम्।।1।।

प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनम्।

तृतीये नार्जितो पुण्यं चतुर्थे किं करिष्यति।।2।।

सर्वतीर्थमयी माता सर्वदेवमयः पिता।

मातरं पितरं तस्मात् सर्वयत्नेन पूजयेत्।।3।।

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।

तस्मात् तदेव वक्तव्यं वचने का दरिद्रता।।4।।

सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्।

प्रियं च नानृतं ब्रूयाद् एष धर्मः सनातनः ।।5।।

जाड्यं धियो हरति सिञ्चति वाचि सत्यं

मानोन्नतिं दिशति पापमपाकरोति।

लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं

सत्सङ्गतिः कथय किं न करोति पुंसाम्।।6।।

शब्दार्थः

**क्षणशः** = प्रतिपल। **चिन्तयेत्** = चिन्तन करना चाहिए। **नार्जिता** = नहीं प्राप्त किया। **तुष्यन्ति** = तुष्ट होते हैं। **वक्तव्यम्** = बोलना चाहिए। **अनृतम्** = झूठ। **जाड्यं धियः** = बुद्धि की जड़ता। **पापमपाकरोति** = ( पापम्+अपाकरोति) पापों को दूर करती है। **तनोति** = फैलाती है। **दिक्षु** = दिशाओं में। **पुंसाम्** = व्यक्तियों

अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

क्षणशः कणशश्चैव सर्वदेवमयः पूजयेत्

ब्रूयात् मानोन्नतिम् पापमपाकरोति सत्सङ्गतिः

**2. एकपदेन उत्तरत -**

(क) क्षणत्यागे किं न भवति?

(ख) द्वितीये किं नार्जितम्?

(ग) सर्वतीर्थमयी का अस्ति?

(घ) सर्वे जन्तवः केन तुष्यन्ति?

(ङ) कीदृशं प्रियं न ब्ररूयात्?

**3. वाक्यानि पूर्तिं कुरुत -**

(क) कणत्यागे कुतः ................ ।

(ख) तृतीये नार्जितः ............... ।

(ग) सर्वदेवमयः .................. अस्ति ।

(घ) प्रियवाक्यप्रदानेन सर्वे ............ तुष्यन्ति।

**4. संस्कृतभाषायाम् अनुवादं कुरुत -**

(क) माता-पिता की पूजा करनी चाहिए।

(ख) समय का पालन करो।

(ग) बोलने में कैसी दरिद्रता ?

(घ) प्रिय तथा सत्य बोलना चाहिए।

(ङ) प्रियवाक्य प्रदान करने से सभी जन्तु तुष्ट होते हैं।

**5. उपयुक्तकथनानां समक्षम् 'आम्' अनुपयुक्तकथनानां समक्षं 'न' इति लिखत -**

(क) कणत्यागे धनं न भवति।

(ख) विद्यार्थिजीवने विद्या न अर्जनीया।

(ग) मातरं पितरं च सर्वयत्नेन पूजयेत्।

(घ) प्रियवाक्यप्रदानेन सर्वे जन्तवः न तुष्यन्ति।

(ङ) सत्संङ्गतिः किमपि पुंसां न करोति।

**6. अधोलिखित-क्रियापदानां लकारं पुरुषं वचनं च लिखत -**

क्रियापदम् लकारः पुरुषः वचनम्

चिन्तयेत्................. ............ .................

करिष्यति ................. ............ .................

ब्रूयात्................. ............ .................

सिञ्चन्ति ................. ............ .................

**7. रेखांकितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत -**

यथा- परिश्रमेण सफलता मिलति। केन सफलता मिलति ?

(क) मधुरवचनेन जनाः प्रसन्नाः भवन्ति।

(ख) व्यायामेन शरीरं स्वस्थं भवति।

(ग) मातुः आज्ञां पालयेत्।

(घ) वृक्षैः प्राणवायुः प्राप्यते।

शिक्षण-सङ्केतः

1. सुभाषितश्लोकानां सामूहिकगानं कारयत।

2. श्लोकानां हिन्दीभाषायाम् अर्थं लेखयत।

**एतदपि जानीत-**

**कुछ पशु-पक्षी के संस्कृत नाम-**

**दर्दुरः** = मेढक। **वृकः** =भेड़िया।

**मार्जारी** =बिल्ली। **वृषभः=** बैल।

**बलाकः** =बगुला। **धेनुः** =गाय।

**षट्पदः** =भौंरा। **गजः=** हाथी।

**लूता=** मकड़ी। **मेषः** =भेंड़।

**कुक्कुटः** =मुर्गा। **भल्लूकः** =भालू।

**चातकः=** पपीहा। **वानरः** =वानर।

**घोटकः**/अश्वः= घोड़ा। **कपोतः** =कबूतर।

**चटका=** गौरैया। **शृगालः** =सियार।

## अतिस्नेहः पापशङ्की